Shri Raghunatha Temple MSS. Library, JAMMU

No. ११०१ - घ

Title चतुःश्लोकि भागवतम्

Author

Extent १ Age

Subject पुराणम् . सम्पूर्णम्

नं० ११०१-घ

चतुःश्लोकिभागवतम् (पुराणम्)

पत्रम् १ (सम्पूर्णम्)

नं० ११०१-घ

१ पत्रा

ॐ नमः विष्णवे ॥ श्रीभगवानुवाच ॥
ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वि
तं ॥ सरहस्यं तदंगं च गृहाण गदितं म
या ॥१॥ यावानहं यथाभावो यद्रूपगुण
कर्मकः तथैव तत्त्वविज्ञानमस्तु ते मद
नुग्रहात् ॥२॥ अहमेवासमेवाग्रे नान्य
द्यत्सदसत्परं ॥ पश्चादहं यदेतच्च यो
ऽवशिष्येत सोस्म्यहं ॥३॥ ऋतेर्थं यत्प्र
तीयेत न प्रतीयेत चात्मनि ॥ तद्विद्यादात्म
नो मायां यथाभासो यथा तमः ॥४॥ यथा महा
न्ति भूतानि भूतेषूच्चावचेष्वनु ॥ प्रविष्टान्य
प्रविष्टानि तथा तेषु न तेष्वहं ॥५॥ एतावदेव

जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः। अन्वय
व्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा॥ ६॥
एतन्मतं समातिष्ठ परमेण समाधिना। भ
वान्कल्पविकल्पेषु न विमुह्यति कर्हि॥
चित्॥ ७॥ इति श्री चतुश्लोकी भाग
वतं समाप्तम्॥ ॥ ॥ राम॥ ॥ कृष्ण॥ विष्णु॥

